# अभ्यास–प्रश्नपत्रम् 2014

## संस्कृतम्

अवधि : होरात्रयम् **Class - IX** पूर्णाङ्काः – नवतिः

---

### खण्डः 'क'—अपठितांश-अवबोधनम् 10 अङ्काः

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत—**

**अनुच्छेदः**

राष्ट्रपिता महात्मागान्धिः स्वशिक्षां समाप्य विदेशं अध्ययनार्थं अगच्छत्। तत्र स विधिशिक्षां प्राप्तवान्। स मातुराज्ञा प्राप्त्यर्थं तिस्रः प्रतिज्ञां अकरोत्—नाहं विदेशे मदिरासेवनं करिष्ये, न मांसस्पर्शमपि करिष्यामि, पूर्णरूपेण ब्रह्मचर्य व्रतमाचरिष्यामि। ततः प्रत्यावृत्य स अनेकानि आन्दोलनानि कृत्वा देशस्य स्वतन्त्रता प्राप्तयर्थं सहायतां अकरोत्। वास्तविकं भारतं ग्रामेषु वसति इति विचार्य ग्रामीण जनानां दशां तेषां मनः स्थितिं च ज्ञातुं स दीर्घाम् पदयात्राम् अकरोत्। ग्रामेषु अनेकान् सामाजिकदोषान् दूरीकुर्वन् सः महतीं प्रतिष्ठां अविन्दत्। 10

**प्रश्नाः—** 1/2 × 4 = 2

**I. एकपदेन उत्तरत–**

1. महात्मागान्धिः मातुः समीपे कति प्रतिज्ञां अकरोत्?
2. सः केषाम् शिक्षायै विदेशम् अगच्छत्?
3. महात्मागांधिः अध्ययनार्थं कुत्र अगच्छत्?
4. महात्मागांधिः कस्याः आज्ञां प्राप्तयर्थं प्रतिज्ञां अकरोत्?

**II. पूर्णवाक्येन उत्तरत—** 2 × 1 = 2

गान्धिः मातुः अनुमतिं प्राप्त्यर्थं काः प्रतिज्ञाः अकरोत्?

**III. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

**IV. भाषिककार्यम्—** 1 × 4 = 4

1. 'महतीं प्रतिष्ठां' अत्र किम् विशेषणपदं प्रयुक्तम्?
   (*i*) महतीं (*ii*) प्रतिष्ठां
2. 'प्रत्यावृत्य' अत्र कः प्रत्ययः प्रयुक्तः?
   (*i*) क्त (*ii*) क्त्वा (*iii*) ल्यप् (*iv*) अनीयर्
3. 'आचरिष्यामि' इति क्रियापदस्य किं कर्तृपदं अत्र प्रयुक्तम्?
   (*i*) विदेशे (*ii*) अहं (*iii*) सेवनम् (*iv*) पूर्णरूपेण
4. 'प्राप्त्यर्थम्' अत्र सन्धिच्छेदं अस्ति।
   (*i*) प्राप्ति + अर्थम् (*ii*) प्रा + आप्त्यर्थम् (*iii*) प्राप् + त्यर्थम् (*iv*) प्राप्त + अर्थम्

### खण्डः 'ख'—रचनात्मकं-लेखनम् 15 अङ्काः

**पत्रलेखनम्**

**2. भवान् गौरवः। तव भगिन्याः परीक्षाफलं सन्तोषजनकः नासीत्। अतः तां प्रति परिश्रमस्य महत्त्वसूचकं लिखितं पत्रं मञ्जूषायाम् प्रदत्तैः शब्दैः पूरयत।** 1/2 × 10 = 5

JSUNIL TUTORIAL

परीक्षाभवनम्

(*i*) ..............................................

तिथिः 18.9.20XX

प्रिया भगिनी रमे,

(*ii*) ..................................

भवतः परीक्षासफलता पत्रम् (*iii*) .................................. प्राप्तम्। तव सफलतां (*iv*) .................................. मनसि अति प्रसन्नता अभवत्। परं संस्कृतभाषायाम् तव अङ्काः (*v*) .................................. आसन् इति दृष्ट्वा तु अहम् (*vi*) .................................. अभवम्। अतः त्वं प्रतिदिन संस्कृतभाषायाः (*vii*) .................................. कुरु। (*viii*) .................................. सर्वाणि कार्याणि (*ix*) .................................. । मातृपित्रोः (*x*) .................................. सादरं प्रणामः।

भवदीय अग्रजः

गौरवः

**मञ्जूषा—** | ज्ञात्वा, मुम्बईतः, मधुर-स्मृतिः, न्यूनाः, अद्यैव, चरणयोः, अभ्यासं, खिन्नः, अभ्यासेन, सिध्यन्ति।

## चित्रवर्णनम्

**3. अधोप्रदत्तं चित्रं दृष्ट्वा मञ्जूषायाम् प्रदत्तशब्दानां सहायतया पञ्चसंस्कृतवाक्यानि लिखत—** **2 × 5 = 10**



**मञ्जूषा—** | रङ्गमञ्चम्, विशालं मञ्चम्, ध्वनिप्रक्षेपकयन्त्रम्, बालकाः बालिकाः च, गीतं प्रस्तुयन्ते।

**अथवा**

## अनुच्छेदलेखनम्

**मञ्जूषायां प्रदत्तशब्दानां सहायतया 'मम विद्यालयः' इति विषयम् अधिकृत्य पञ्चसंस्कृतवाक्यानि लिखत।** **2 × 5 = 10**

**मञ्जूषा—** | विशालं भवनम्, क्रीडाक्षेत्रम्, तरणतालः, पुस्तकालयः, विशालं उद्यानम्, नाम, अध्यापकः।

JSUNIL TUTORIAL

## खण्डः 'ग' —अनुप्रयुक्त-व्याकरणम् 30 अङ्काः

**4. ( अ ) अधोलिखितानां वर्णानां समुचितम् उच्चारणस्थानानि विकल्पेभ्यः चित्वा लिखत—** 1/2 × 4 = 2

1. छ् — (*i*) कण्ठ्यः (*ii*) तालव्यः (*iii*) ओष्ठ्यः
2. स् — (*i*) दन्त्यः (*ii*) तालव्यः (*iii*) मूर्धन्यः
3. द् — (*i*) कण्ठ्यः (*ii*) तालव्यः (*iii*) दन्त्यः
4. फ — (*i*) ओष्ठ्यः (*ii*) दन्त्यः (*iii*) कण्ठ्यः

**(आ) अधोलिखितयोः शब्दयोः उचितवर्णविन्यासं चिनुत—** 1 × 1 = 1

पित्रिच्छा—

(*i*) प् + इ + त् + र् + इ + च् + छ् + आ

(*ii*) प् + इ + त् + इ + र् + च् + छ् + आ

(*iii*) प् + इ + त् + र् + ई + च् + छ् + आ

**( इ ) अधोलिखितान् वर्णान् संयोज्य एकपदं लिखत–** 1 × 1 = 1

अ + व् + अ + ल् + अ + म् + ब् + य् + अ = ..........................................

**5. निम्नलिखितानाम् रेखाङ्कितपदानाम् विकल्पेषु सन्धिच्छेदस्य सन्धेः वा उचितं रूपं चिनुत—** 1/2 × 10 = 5

1. तव प्रत्यागमनम् मे रोचते।

   (*i*) प्रत्य + आगमनम् (*ii*) प्रति + आगमनम् (*iii*) प्रत्या + गमनम्

2. भ्रमरस्य षट् + अंगानि कीदृशानि सन्ति?

   (*i*) षटांगानि (*ii*) षड्अंगानि (*iii*) षडंगानि

3. धन्यं तद्धनम् यत् दरिद्रान् भरति।

   (*i*) तच् + धनम् (*ii*) तत् + धनम् (*iii*) तद् + धनम्

4. अस्य नियमस्य उल्लङ्घनम् मा कुरु।

   (*i*) उल् + लङ्घनम् (*ii*) उद् + लङ्घनम् (*iii*) उत् + लङ्घनम्

5. शिशुः + हसति।

   (*i*) शिशुर्हसति (*ii*) शिशु हसति (*iii*) शिशो हसति (*iv*) शिशुस्हसति

6. बालः + अयम् कुत्र निवसति?

   (*i*) बालोऽयम् (*ii*) बालोअयम् (*iii*) बालयम् (*iv*) बालअयम्

7. षडाननस्य कार्तिकेयस्य अत्र मन्दिरं वर्तते।

   (*i*) षट् + आननस्य (*ii*) षड + आननस्य (*iii*) षड् + आननस्य (*iv*) षडा + आननस्य

8. नीरसं कवितां किमर्थं शृणोषि?

   (*i*) नीर + सम् (*ii*) निर् + रसम् (*iii*) नी + रसम् (*iv*) नि + रसम्

9. अस्य कथायाः उत् + लेखः अत्र नास्ति?

   (*i*) उल्लेखः (*ii*) उल्लेखः (*iii*) उद्लेख (*iv*) उन्लेखः

10. अत्र अस्मिन् विषये मतैक्यम् नास्ति।

    (*i*) मत + ऐक्यम् (*ii*) मत + एक्यम् (*iii*) मतै + क्यम् (*iv*) मते + एक्यम्

**6. अधोलिखितवाक्येषु रिक्तस्थानेषु किं पदं भविष्यति?** 1/2 × 10 = 5

1. .......................................... आज्ञाकारी पुत्रः कः अस्ति?

   (*i*) पिता (*ii*) पितरम् (*iii*) पितुः (*iv*) पितृस्य

JSUNIL TUTORIAL

2. सचिन तेंदुलकरः ........................................ प्रसिद्धः क्रीडकः अस्ति।

(*i*) क्रिकेटः (*ii*) क्रिकेटम् (*iii*) क्रिकेटेन् (*iv*) क्रिकेटस्य

3. तेन ........................................ नम्यते।

(*i*) जननीम् (*ii*) जननी (*iii*) जनन्यै (*iv*) जनन्याः

4. तत्र पञ्च ........................................ पठ्यन्ते।

(*i*) छात्रः (*ii*) छात्रेभ्यः (*iii*) छात्राः (*iv*) छात्राणाम्

5. ........................................ उभयतः भवनानि सन्ति।

(*i*) नगरं (*ii*) नगरस्य (*iii*) नगरे (*iv*) नगराय

6. ........................................ बालकस्य माता शिक्षिका अस्ति।

(*i*) अस्य (*ii*) अस्यः (*iii*) अस्याः (*iv*) अस्या

7. मम गृहे वहूनि ........................................ सन्ति।

(*i*) वस्तुनी (*ii*) वस्तु (*iii*) वस्तुनि (*iv*) वस्तूनि

8. मम गृहस्य उद्याने ........................................ सन्ति।

(*i*) पुष्पानि (*ii*) पुष्पैः (*iii*) पुष्पाणि (*iv*) पुष्पाणी

9. एतासु ........................................ खगाः उपविशन्ति।

(*i*) शाखायाम् (*ii*) शाखानाम् (*iii*) शाखाः (*iv*) शाखासु

10. तेन ........................................ किं यत् भ्रान्तिं जनयति।

(*i*) पुस्तकम् (*ii*) पुस्तकस्य (*iii*) पुस्तकाय (*iv*) पुस्तकेन

**7. अधोलिखितवाक्येषु कोष्ठके प्रदत्तधातूनां क्रियापदानां समुचितं पदं किं भविष्यति?** **1/2 × 10 = 5**

1. सा मम वचनम् न ........................................। (श्रु, लट्)

(*i*) श्रृणोमि (*ii*) श्रृणोति (*iii*) श्रृण्वन्ति (*iv*) श्रृणुमः

2. भवन्तः ईश्वरं ........................................। (नम्, लट्)

(*i*) नमतः (*ii*) नमन्ति (*iii*) नमति (*iv*) नमामि

3. आवाम् मुम्बईनगरं ........................................। (या, लृट्)

(*i*) यास्यति (*ii*) यास्यामः (*iii*) यावः (*iv*) यास्यावः

4. अशोकः एकः प्रतापी नृपः ........................................। (अस्, लङ्)

(*i*) आसीत् (*ii*) भविष्यति (*iii*) आसीः (*iv*) आस्त

5. आवाम् पर्यावरणं दूषितं न ........................................। (कृ, लृट्)

(*i*) करिष्यामः (*ii*) करिष्यावः (*iii*) करिष्यति (*iv*) करिष्यन्ति

6. वयम् इमानि पुष्पाणि न ........................................। (स्पृश, लङ्)

(*i*) अस्पृशाम (*ii*) अस्पृशम् (*iii*) अस्पृशन् (*iv*) अस्पृशाव

7. अद्य मम पितामहः विद्यालयं ........................................। (आ + गम् + लृट्)

(*i*) आगमिष्यति (*ii*) आगमिष्यन्ति (*iii*) आगच्छतु (*iv*) आगच्छति

8. रात्रौ उत्सवे बालिकाः ........................................। (नृत् + लृट्)

JSUNIL TUTORIAL

(*i*) अनृत्यन् (*ii*) नृत्यन्ति (*iii*) नर्तिष्यन्ति (*iv*) नर्तिष्यत:

9. रमा मधुरम् गीतं .................................. । (गै, लङ्)

(*i*) गायेत (*ii*) गायतु (*iii*) अगायत् (*iv*) अगायन्

10. यूयम् सम्यक् पाठं .................................. । (स्मृ + लट्)

(*i*) स्मरति (*ii*) स्मरथ: (*iii*) स्मरथ (*iv*) स्मरत

**8. मञ्जूषात: उचितानि पदानि चित्वा अधोलिखिते अनुच्छेदे रिक्तस्थानानि पूरयित्वा अनुच्छेदं पुन: लिखत— 1 × 5 = 5**

विद्यालयं परित: (*i*) .................................. अस्ति। मम विद्यालय: (*ii*) .................................. एव। अस्य भवनं विशालम् अस्ति। अस्मिन् अनेके वृक्षा: सन्ति। तेषाम् दीर्घा: शाखा: (*iii*) .................................. उपरि अपतन्। अहम् (*iv*) .................................. नमामि। स: (*v*) .................................. श्रेष्ठ: अस्ति।

**मञ्जूषा—** | भित्तिका, भवनस्य, गुरुम्, दिल्लयाम्, गुरु:। |

**9. ( क ) प्रकृतिप्रत्ययौ संयोज्य रिक्तस्थानपूर्तिं कुरुत। 1 × 3 = 3**

1. विप्र: श्राद्धं .................................. प्रत्यागच्छति। (गृह् + क्त्वा)
2. वानरा: वृक्षम् .................................. पर्णाणि त्रोट्यन्ति। (आ + रूह् + ल्यप्)
3. अहं प्रात: .................................. उद्यानं गच्छामि। (भ्रम् + तुमुन्)

**( ख ) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ पृथक्कृत्य लिखत। 1 × 3 = 3**

1. मातापितरौ <u>संपूज्य</u> पुत्र शान्तिं लभते। .................. + .................. + ..................
2. शिशु: दुग्धं <u>पीत्वा</u> शयनं करोति। .................. + .................. + ..................
3. अद्य वयं पीजां <u>खादितम्</u> डोमिनोजं अगच्छाम्। .................. + .................. + ..................

## खण्ड: 'घ'—पठितांश-अवबोधनम् 35 अङ्का:

**10. निम्नलिखितम् गद्यांशं, पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायाम् लिखत—**

**( अ ) गद्यांश:**

भवतु चिरकालपालितम् इमं पुत्रनिर्विशेषं नकुलं बालरक्षायां व्यवस्थाप्य गच्छामि। तथा कृत्वा गत:। ततस्तेन नकुलेन बालसमीपम् उपसर्पन् कृष्णसर्प: दृष्ट:। स तं व्यापाद्य खण्डश: कृतवान्। अत्रान्तरे ब्राह्मणोऽपि श्राद्धं गृहीत्वा गृहम् उपावृत्त:। ब्राह्मणं दृष्ट्वा नकुल: रक्तविलिप्तमुखपाद: तस्य चरणयो: अलुठत्। विप्र: तथाविधं तं दृष्ट्वा बालकोऽनेन खादित: इति अवधार्य कोपात् नकुलं व्यापादितवान्।

5

**I. प्रश्ना:— 1/2 × 2 = 1**

1. नकुल: बालसमीपम् उपसर्पन् कम् पश्यति?
2. ब्राह्मणस्य चरणयो: क: अलुठत्?

(*i*) नकुल: (*ii*) सर्प: (*iii*) बालक: (*iv*) कोऽपि न:

**II. पूर्णवाक्येन उत्तरत— 2 × 1 = 2**

ब्राह्मण: किं कृत्वा श्राद्धार्थम् गत: ?

JSUNIL TUTORIAL

**III. भाषिककार्यम्—** 1 × 2 = 2

1. 'पुत्रनिर्विशेषं नकुलं' अनयो: पदयो: किं विशेषणपदम्?

   (*i*) पुत्र: (*ii*) नकुलं (*iii*) पुत्रनिर्विशेषम्

2. 'कृतवान्' अत्र क: प्रत्यय:?

   (*i*) क्त्वा (*ii*) क्त (*iii*) क्तवतु

**(आ) पद्यांश:**

**वयमिह परितुष्टा: वल्कलैस्त्वं दुकूलै:**
**सम इह परितोषो निर्विशेषो विशेष:।**
**स तु भवति दरिद्रो यस्य तृष्णा विशाला**
**मनसि च परितुष्टे कोऽर्थवान् को दरिद्र:॥** 5

**I. प्रश्ना:—** 1 × 1 = 1

यस्य तृष्णा विशाला सा क:?

**II. पूर्णवाक्येन उत्तरत—** 2 × 1 = 2

क: दरिद्र: भवति?

**III. भाषिककार्यम्—** 1 × 2 = 2

1. 'परितुष्टा' अत्र क: प्रत्यय:?

   (*i*) टाप् (*ii*) क्त (*iii*) क्त्वा

2. 'वल्कलैस्त्वं' अत्र सन्धिच्छेद: कुरुत।

   (*i*) वल्कलै + त्वम् (*ii*) वल्कलै: + त्वम् (*iii*) वल्कल + त्वम्

**(इ) नाट्यांश:**

**लक्ष्मण:** — (विलोक्य) अये अयम् आर्य: राम:। न, न, रूपसादृश्यम्। (सुमन्त्रं दृष्ट्वा) अये तात:।
**सुमन्त्र:** — अये कुमार: लक्ष्मण:!
**भरत:** — एवं, गुरु: अयम्। आर्य! अभिवादये।
**लक्ष्मण:** — एहि एहि। आयुष्मान् भव (सुमन्त्रं वीक्ष्य) तात! क: अत्रभवान्?
**सुमन्त्र:** — कुमार! अयं भरत: कुमार:।
**लक्ष्मण:** — एहि एहि इक्ष्वाकुकुमार। वत्स! स्वस्ति, आयुष्मान् भव।
**भरत:** — अनुगृहीतोऽस्मि।
**लक्ष्मण:** — कुमार! इह तिष्ठ! त्वदागमनम् आर्याय निवेदयामि।
**भरत:** — आर्य! अचिरम् इदानीम् अभिवादयितुमिच्छामि। शीघ्रं निवेद्यताम्।
**लक्ष्मण:** — बाढम् (उपेत्य) जयतु आर्य:। आर्य! 5

**I. प्रश्ना:—** 1/2 × 2 = 1

1. 'गुरु: अयम्' अत्र अयम् पदं कस्मै प्रयुक्तम्?
2. भरतागमनं रामाय क: निवेदयति?

**II. पूर्णवाक्येन उत्तरत—** 2 × 1 = 2

भरत: कम् अचिरम् अभिवादयितुम् इच्छति?

JSUNIL TUTORIAL

**III. भाषिककार्यम्—** 1 × 2 = 2

1. कुमार! इह तिष्ठ! अत्र 'कुमार' शब्दः कस्मै प्रयुक्तः?

   (i) भरताय (ii) लक्ष्मणाय (iii) रामाय (iv) सुमन्त्राय

2. 'गुरुः अयम्' अनयोः पदयोः किं विशेषणपदम्?

**11. अधोलिखितश्लोकयोः भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत।** 4

**(क) आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः।**

**क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्॥** 1/2 × 4 = 2

**भावः—** आदानं (i) .................... तथा च यत् किमपि कर्म भवति तत् समये (ii) .................... करणीयम्। यदि वयं कार्यं (iii) .................... करिष्यामः तदा (iv) .................... तस्य रसं पिबति, तस्य उपयोगिता नाशयति।

**(ख) माता शत्रुः पिता वैरी येन बालो न पाठितः।**

**न शोभते सभामध्ये हंसमध्ये बको यथा॥** 1/2 × 4 = 2

**भावः—** सा माता (i) .................... शत्रुः सः पिता अपि वैरी येन बालः न (ii) .................... यतोहिं यथा हंसानाम् सभायाम् (iii) .................... न शोभते। एवं विदुषाम् सभायाम् विद्याविहीनः अज्ञः (iv) ....................।

**मञ्जूषा—** | क्षिप्रं, प्रदानम्, कालः, बकः, शीघ्रतया, बालस्य, शोभते, पाठितः। |

**12. निम्नलिखितयोः श्लोकयोः अन्वयम् उचितक्रमेण पूरयित्वा पुनः लिखत—** 4

**(क) पादोपभुक्ते तव पादुके मे एते प्रयच्छ प्रणताय मूर्ध्ना।**

**यावद् भवानेष्यति कार्यसिद्धिं तावद्भविष्याम्यनयोर्विधेयः॥** 1/2 × 4 = 2

**अन्वयः—** एते तव पादोपभुक्ते (i) .................... मूर्ध्ना प्रणताय मे प्रयच्छ। (ii) .................... भवान् (iii) .................... एष्यति तावद् अनयोः (iv) .................... भविष्यामि।

**(ख) भवन्ति नम्रास्तरवः फलोद्गमैः**

**नवाम्बुभिर्भूरिविलम्बिनो घनाः।**

**अनुद्धताः सत्पुरुषाः समृद्धिभिः**

**स्वभाव एवैष परोपकारिणाम्॥** 1/2 × 4 = 2

**अन्वयः—** तरवः फलोद्गमैः (i) .................... भवन्ति घनाः (ii) .................... भूरिविलम्बिनो सत्पुरुषा (iii) .................... अनुद्धताः एष एव (iv) .................... स्वभावः।

**13. अधोलिखितेषु रेखाङ्कितपदानि आधृत्यं प्रश्ननिर्माणम् क्रियताम्—** 1 × 4 = 4

1. ब्राह्मणः <u>दारिद्रयात्</u> अचिन्तयत्।
2. तन्तुवायः <u>तन्तुवयनेन</u> जीविकाम् अर्जयति स्म।
3. वृक्षाणां फलानि अपि <u>परार्थाय</u> भवन्ति।
4. श्वेतकेतुः <u>वेदान्</u> अधीत्य आगच्छत्।

JSUNIL TUTORIAL

**14. निम्नलिखितानि वाक्यानि घटनाक्रमानुसारम् पुनः लेखनीयानि लिखत—** 1/2 × 8 = 4

1. विष्णुशर्मानामा महापण्डितः राजपुत्रेभ्यः नीतिज्ञानं दातुम् इच्छति।
2. विष्णु राजपुत्रान् शिक्षयति।
3. सः केनापि पठ्यमानं श्लोकद्वयम् अश्रृणोत्।
4. एतत् चिन्तयित्वा राजा पण्डितसभां कारितवान्।
5. सुदर्शनः नाम कश्चित् राजा आसीत्।
6. राजा पृच्छति कः मम पुत्राणां नीतिज्ञानेन पुनर्जन्म कारयितुं समर्थः ?
7. श्लोकद्वयम् आकर्ण्य राजा आत्मनः पुत्राणां विषये चिन्तयति।
8. राजा विष्णुशर्मणः करे निजपुत्रान् समर्पयति।

**15. अधोलिखितपङ्क्तिषु रेखाङ्कितपदानाम् प्रसङ्गानुसारम् शुद्धम् अर्थम् चित्वा लिखत—** 1 × 4 = 4

1. गौरवं प्राप्यते दानात् न तु वित्तस्य संचयात्।

   (*i*) भूतस्य (*ii*) धनस्य (*iii*) चरित्रस्य

2. नगरपालं समाहूय आदिश्यताम्।

   (*i*) आह्वानं कृत्वा (*ii*) समीपं गत्वा (*iii*) उक्त्वा

3. एवम् अणिम्नः स्थूलं जगद् उद्भवति।

   (*i*) सूक्ष्मात् (*ii*) साम्प्रतम् (*iii*) विशालात्

4. यद् वस्तु भवदीयम् अस्ति, तत् मह्यम् अस्ति।

   (*i*) युष्माकम् (*ii*) भवन्तम् (*iii*) भवतः

❑❑

JSUNIL TUTORIAL